# Bhagavadgita Mahatmyam and DhyAnamantra

# ભગવદ્ગીતામાહાત્મ્યં ધ્યાનમન્ત્રં ચ

## Document Information

Text title : bhagavadgItA mAhAtmyaM dhyAnamantraM cha

File name : bgmahat.itx

Category : gItA, giitaa, bhagavadgItA, vyAsa

Location : doc_giitaa

Author : Vyasa

Transliterated by : NA

Proofread by : NA

Latest update : August 8, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# ભગવદ્ગીતામાહાત્મ્યં ધ્યાનમન્ત્રં ચ

॥ શ્રી પરમાત્મને નમઃ ॥

॥ અથ શ્રીગીતામાહાત્મ્યપ્રારમ્ભઃ ॥

શ્રી ગણેશાય નમઃ ॥ શ્રીરાધારમણાય નમઃ ॥

ધરોવાચ ।
ભગવન્પરમેશાન ભક્તિરવ્યભિચારિણી ।
પ્રારબ્ધં ભુજ્યમાનસ્ય કથં ભવતિ હે પ્રભો ॥ ૧॥

શ્રી વિષ્ણુરુવાચ ।
પ્રારબ્ધં ભુજ્યમાનો હિ ગીતાભ્યાસરતઃ સદા ।
સ મુક્તઃ સ સુખી લોકે કર્મણા નોપલિપ્યતે ॥ ૨॥

મહાપાપાદિપાપાનિ ગીતાધ્યાનં કરોતિ ચેત્ ।
ક્વચિત્સ્પર્શં ન કુર્વન્તિ નલિનીદલમમ્બુવત્ ॥ ૩॥

ગીતાયાઃ પુસ્તકં યત્ર યત્ર પાઠઃ પ્રવર્તતે ।
તત્ર સર્વાણિ તીર્થાણિ પ્રયાગાદીનિ તત્ર વૈ ॥ ૪॥

સર્વે દેવાશ્ચ ઋષયો યોગિનઃ પન્નગાશ્ચ યે ।
ગોપાલા ગોપિકા વાપિ નારદોદ્ધવપાર્ષદૈઃ ॥

સહાયો જાયતે શીઘ્રં યત્ર ગીતા પ્રવર્તતે ૫॥

યત્ર ગીતાવિચારશ્ચ પઠનં પાઠનં શ◌ૃતમ્ ।
તત્રાહં નિશ્ચિતં પૃથ્વિ નિવસામિ સદૈવ હિ ॥ ૬॥

ગીતાશ્રયેઽહં તિષ્ઠામિ ગીતા મે ચોત્તમં ગૃહમ્ ।
ગીતાજ્ઞાનમુપાશ્રિત્ય ત્રીંલોકાન્પાલયામ્યહમ્ ॥ ૭॥

ગીતા મે પરમા વિદ્યા બ્રહ્મરૂપા ન સંશયઃ ।
અર્ધમાત્રાક્ષરા નિત્યા સ્વાનિર્વાચ્યપદાત્મિકા ॥ ૮॥

ચિદાનન્દેન કૃષ્ણેન પ્રોક્તા સ્વમુખતોઽર્જુનમ્ ।
વેદત્રયી પરાનન્દા તત્ત્વાર્થજ્ઞાનસંયુતા ॥ ૯॥

યોઽષ્ટાદશજપો નિત્યં નરો નિશ્ચલમાનસઃ ।
જ્ઞાનસિદ્ધિં સ લભતે તતો યાતિ પરં પદમ્ ॥ ૧૦॥

પાઠેઽસમર્થઃ સમ્પૂર્ણે તતોઽર્ધં પાઠમાચરેત્ ।
તદા ગોદાનજં પુણ્યં લભતે નાત્ર સંશયઃ ॥ ૧૧॥

ત્રિભાગં પઠમાનસ્તુ ગઙ્ગાસ્નાનફલં લભેત્ ।
ષડંશં જપમાનસ્તુ સોમયાગફલં લભેત્ ॥ ૧૨॥

એકાધ્યાયં તુ યો નિત્યં પઠતે ભક્તિસંયુતઃ ।
રુદ્રલોકમવાપ્નોતિ ગણો ભૂત્વા વસેચ્ચિરમ્ ॥ ૧૩॥

અધ્યાયં શ્લોકપાદં વા નિત્યં યઃ પઠતે નરઃ ।
સ યાતિ નરતાં યાવન્મન્વન્તરં વસુન્ધરે ॥ ૧૪॥

ગીતાયાઃ શ્લોકદશકં સપ્ત પઞ્ચ ચતુષ્ટયમ્ ।
દ્વૌ ત્રીનેકં તદર્ધં વા શ્લોકાનાં યઃ પઠેન્નરઃ ॥ ૧૫॥

ચન્દ્રલોકમવાપ્નોતિ વર્ષાણામયુતં ધ્રુવમ્ ।
ગીતાપાઠસમાયુક્તો મૃતો માનુષતાં વ્રજેત્ ॥ ૧૬॥

ગીતાભ્યાસં પુનઃ કૃત્વા લભતે મુક્તિમુત્તમામ્ ।
ગીતેત્યુચ્ચારસંયુક્તો મ્રિયમાણો ગતિં લભેત્ ॥ ૧૭॥

ગીતાર્થશ્રવણાસક્તો મહાપાપયુતોઽપિ વા ।
વૈકુણ્ઠં સમવાપ્નોતિ વિષ્ણુના સહ મોદતે ॥ ૧૮॥

ગીતાર્થં ધ્યાયતે નિત્યં કૃત્વા કર્માણિ ભૂરિશઃ ।
જીવન્મુક્તઃ સ વિજ્ઞેયો દેહાન્તે પરમં પદમ્ ॥ ૧૯॥

ગીતામાશ્રિત્ય બહવો ભૂભુજો જનકાદયઃ ।
નિર્ધૂતકલ્મષા લોકે ગીતાયાતાઃ પરં પદમ્ ॥ ૨૦॥

ગીતાયાઃ પઠનં કૃત્વા માહાત્મ્યં નૈવ યઃ પઠેત્ ।
વૃથા પાઠો ભવેત્તસ્ય શ્રમ એવ હ્યુદાહૃતઃ ॥ ૨૧॥

એતન્માહાત્મ્યસંયુક્તં ગીતાભ્યાસં કરોતિ યઃ ।

સ તત્ફલમવાપ્નોતિ દુર્લભાં ગતિમાપ્નુયાત્ ॥ ૨૨॥

સૂત ઉવાચ ।

માહાત્મ્યમેતદ્ગીતાયા મયા પ્રોક્ત સતાતનમ્ ।
ગીતાન્તે ચ પઠેદ્યસ્તુ યદુક્તં તત્ફલં લભેત્ ॥ ૨૩॥

॥ ઇતિ શ્રીવારાહપુરાણે શ્રીગીતામાહાત્મ્યં સમ્પૂર્ણમ્ ॥

॥ અથ શ્રીમદ્ભગવદ્ગીતાધ્યાનાદિ ॥

શ્રી ગણેશાય નમઃ ॥ શ્રીગોપાલકૃષ્ણાય નમઃ ॥

અથ ધ્યાનમ્ ।
અથ કરન્યાસઃ ।

ૐ અસ્ય શ્રીમદ્ભગવદ્ગીતામાલામન્ત્રસ્ય
ભગવાન્વેદવ્યાસ ઋષિઃ ॥ અનુષ્ટુપ્ છન્દઃ ॥

શ્રીકૃષ્ણ પરમાત્મા દેવતા ॥

અશોચ્યાનન્વશોચસ્ત્વં પ્રજ્ઞાવાદાંશ્ચ ભાષસે ઇતિ બીજમ્ ॥

સર્વધર્માન્ પરિત્યજ્ય મામેકં શરણં વ્રજ ઇતિ શક્તિઃ ॥

અહં ત્વા સર્વપાપેભ્યો મોક્ષયિષ્યામિ મા શુચ ઇતિ કીલકમ્ ॥

નૈનં છિન્દન્તિ શસ્ત્રાણિ નૈનં દહતિ
પાવક ઇત્યઙ્ગુષ્ઠાભ્યાં નમઃ ॥

ન ચૈનં ક્લેદયન્ત્યાપો ન શોષયતિ મારુત ઇતિ તર્જનીભ્યાં નમઃ ॥

અચ્છેદ્યોઽયમદાહ્યોઽયમક્લેદ્યોઽશોષ્ય
એવ ચ ઇતિ મધ્યમાભ્યાં નમઃ ॥

નિત્યઃ સર્વગતઃ સ્થાણુરચલોઽયં સનાતન ઇત્યનામિકાભ્યાં નમઃ ॥

પશ્ય મે પાર્થ રૂપાણિ શતશોઽથ
સહસ્રશ ઇતિ કનિષ્ઠિકાભ્યાં નમઃ ॥

નાનાવિધાનિ દિવ્યાનિ નાનાવર્ણાકૃતીનિ
ચ ઇતિ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

ઇતિ કરન્યાસઃ ॥

અથ હૃદયાદિન્યાસઃ ॥

નૈનં છિન્દન્તિ શસ્ત્રાણિ નૈનં દહતિ
પાવક ઇતિ હૃદયાય નમઃ ॥

ન ચૈનં ક્લેદયન્ત્યાપો ન શોષયતિ મારુત ઇતિ શિરસે સ્વાહા ॥

અચ્છેદ્યોઽયમદાહ્યોઽયમક્લેદ્યોઽશોષ્ય
એવ ચેતિ શિખાયૈ વષટ્ ॥

નિત્યઃ સર્વગતઃ સ્થાણુરચલોઽયં સનાતન ઇતિ કવચાય હુમ્ ॥

પશ્ય મે પાર્થ રૂપાણિ શતશોઽથ
સહસ્રશ ઇતિ નેત્રત્રયાય વૌષટ્ ॥

નાનાવિધાનિ દિવ્યાનિ નાનાવર્ણાકૃતીનિ
ચેતિ અસ્ત્રાય ફટ્ ॥

શ્રીકૃષ્ણપ્રીત્યર્થે પાઠે વિનિયોગઃ ॥

ૐ પાર્થાય પ્રતિબોધિતાં ભગવતા નારાયણેન સ્વયં
વ્યાસેન ગ્રથિતાં પુરાણમુનિના મધ્યે મહાભારતમ્ ।
અદ્વૈતામૃતવર્ષિણીં ભગવતીમષ્ટાદશાધ્યાયિનીં
અમ્બ ત્વામનુસન્દધામિ ભગવદ્ગીતે ભવેદ્વેષિણીમ્ ॥ ૧॥

નમોઽસ્તુ તે વ્યાસ વિશાલબુદ્ધે ફુલ્લારવિન્દાયતપત્રનેત્ર ।
યેન ત્વયા ભારતતૈલપૂર્ણઃ પ્રજ્વાલિતો જ્ઞાનમયઃ પ્રદીપઃ ॥ ૨॥

પ્રપન્નપારિજાતાયતોત્રવેત્રૈકપાણયે ।
જ્ઞાનમુદ્રાય કૃષ્ણાય ગીતામૃતદુહે નમઃ ॥ ૩॥

વસુદેવસુતં દેવં કંસચાણૂરમર્દનમ્ ।
દેવકીપરમાનન્દં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૪॥

ભીષ્મદ્રોણતટા જયદ્રથજલા ગાન્ધારનીલોત્પલા
શલ્યગ્રાહવતી કૃપેણ વહની કર્ણેન વેલાકુલા ।
અશ્વત્થામવિકર્ણઘોરમકરા દુર્યોધનાવર્તિની
સોત્તીર્ણા ખલુ પાણ્ડવૈ રણનદી કૈવર્તકઃ કેશવઃ ॥ ૫॥

પારાશર્યવચઃ સરોજમમલં ગીતાર્થગન્ધોત્કટં
નાનાખ્યાનકકેસરં હરિકથાસમ્બોધનાબોધિતમ્ ।

લોકે સજ્જનષટ્પદૈરહરહઃ પેપીયમાનં મુદા
ભૂયાદ્ભારતપઙ્કજં કલિમલપ્રધ્વંસિ નઃ શ્રેયસે ॥ ૬॥

મૂકં કરોતિ વાચાલં પઙ્ગું લઙ્ઘયતે ગિરિમ્ ।
યત્કૃપા તમહં વન્દે પરમાનન્દમાધવમ્ ॥ ૭॥

અથ ગીતામાહાત્મ્યમ્ ।
ગીતાશાસ્ત્રમિદં પુણ્યં યઃ પઠેત્પ્રયતઃ પુમાન્ ।
વિષ્ણોઃ પદમવાપ્નોતિ ભયશોકાદિવર્જિતઃ ॥ ૧॥

ગીતાધ્યયનશીલસ્ય પ્રાણાયામપરસ્ય ચ ।
નૈવ સન્તિ હિ પાપાનિ પૂર્વજન્મકૃતાનિ ચ ॥ ૨॥

મલનિર્મોચનં પુંસાં જલસ્નાનં દિને દિને ।
સકૃદ્ગીતામ્ભસિ સ્નાનં સંસારમલનાશનમ્ ॥ ૩॥

ગીતા સુગીતા કર્તવ્યા કિમન્યૈઃ શાસ્ત્રવિસ્તરૈઃ ।
યા સ્વયં પદ્મનાભસ્ય મુખપદ્માદ્વિનિઃસૃતા ॥ ૪॥

ભારતામૃતસર્વસ્વં વિષ્ણોર્વક્ત્રાદ્વિનિઃસૃતમ્ ।
ગીતાગઙ્ગોદકં પીત્વા પુનર્જન્મ ન વિદ્યતે ॥ ૫॥

સર્વોપનિષદો ગાવો દોગ્ધા ગોપાલ નન્દનઃ ।
પાર્થો વત્સઃ સુધીર્ભોક્તા દુગ્ધં ગીતામૃતં મહત્ ॥ ૬॥

એકં શાસ્ત્રં દેવકીપુત્રગીતમેકો
દેવો દેવકીપુત્ર એવ ।
એકો મન્ત્રસ્તસ્ય નામાનિ યાનિ
કર્માપ્યેકં તસ્ય દેવસ્ય સેવા ॥ ૭॥

શાન્તાકારં ભુજગશયનં પદ્મનાભં સુરેશં
વિશ્વાધારં ગગનસદૃશં મેઘવર્ણં શુભાઙ્ગમ્ ।
લક્ષ્મીકાન્તં કમલનયનં યોગિભિર્ધ્યાનગમ્યં
વન્દે વિષ્ણું ભવભયહરં સર્વલોકૈકનાથમ્ ॥

યં બ્રહ્મા વરુણેન્દ્રરુદ્રમરુતઃ સ્તુન્વન્તિ દિવ્યૈઃ સ્તવૈઃ
વેદૈઃ સાઙ્ગપદક્રમોપનિષદૈર્ગાયન્તિ યં સામગાઃ ।
ધ્યાનાવસ્થિતતદ્ગતેન મનસા પશ્યન્તિ યં યોગિનો
યસ્યાન્તં ન વિદુઃ સુરાસુરગણા દેવાય તસ્મૈ નમઃ ॥ ૮॥

॥ ઇતિ ધ્યાનમ્ ॥

Although many prints mention of the mAhAtmyam
from Varaha Purana, the verses are not
found in the Purana in print.

*Bhagavadgita Mahatmyam and DhyAnamantra*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*